International Journal of Sanskrit Research 2024; 10(4): 165-168

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 165-168
© 2024 IJSR
www.anantaajournal.com
Received: 12-06-2024
Accepted: 18-07-2024

मंजुलतासाहु
अध्यापिका, श्रीसोमनाथ बालुङ्केश्वरदेव महिला महाविद्यालयः,खोर्द्धा, ओडिशा, भारत

Corresponding Author:
मंजुलतासाहु
अध्यापिका, श्रीसोमनाथ बालुङ्केश्वरदेव महिला महाविद्यालयः,खोर्द्धा, ओडिशा, भारत

# वैदिकयुगे वैष्णवधर्मविवेचनम्

## मंजुलतासाहु

**सारांश:**
ये भक्ताः भगवान् विष्णुरेव स्वस्य मुख्यदेवः परमात्मा वेति मन्यन्ते ते वैष्णवाः । तत्सम्बद्धाः धार्मिकदर्शनानि सिद्धान्ताश्च वैष्णवधर्मः नाम्ना ख्यातः । विष्णुः वैदिकः देवता यस्य प्रभावः क्रमेण वर्धितः । वैष्णवधर्मे अवैदिकसूक्तानि विष्णुसम्बन्धीनि आख्यानानि सन्ति । ऋग्वेदे देवानां महिमा, पराक्रमः व्यापकत्वं विहाय उपनिषदां ज्ञानं, दर्शनं, सिद्धान्ताः च अस्मिन् धर्मे अन्तर्भूताः सन्ति । याज्ञिककर्मणः स्थाने भक्ति-पूजनयोः समागमः भवति ।

**कूटशब्द:** वैष्णवः, विष्णुः, पञ्चरात्रम्, भागवतधर्मः, वैदिकः, वासुदेवः

## प्रस्तावना

वैष्णवधर्मः, वैष्णवसम्प्रदायः, भागवतधर्मश्च सर्वे प्रायतः पञ्चरात्रपद्धतिमनुश्रुयन्ते । अस्य सम्प्रदायस्य मुख्यपूज्यो वासुदेवः अस्ति । यस्तु षड् गुणैः ज्ञान-शक्ति-बल-वीर्यैश्वर्यतेजोभिः परिपूर्णः । पूज्यकारणेन परमेश्वरः विष्णुः । विष व्यापने नुक्।[1] विशः प्रवेशे वा । तथाहि-

यस्माद् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्माद्देवोच्यते विष्णुर्विशधातोः प्रवेशनात् ॥[2]

इति व्यापकार्थे विष्णुरर्थो बोध्यः । विदित एव खल्वयमर्थः सर्वेषामपि विदुषां यत् जगन्नियन्ता परमेश्वरः एक एव । तदेव पारमेश्वरं तत्त्वं यथा भारतीयानां सारस्वते प्रतिपादितं नैवमन्यत्र क्वापीति । भारतीयानां च निरतिशयप्रमाणभूता ग्रन्था नाम वेदाः प्रसिद्धाः । तन्मूलकत्वेनैव स्मृतिप्रमाणादीनां प्रामाण्यम् । यच्च वेदविरोधि तत्पुनस्त्याज्यमेवेति निश्चिन्वते श्रुतिमात्रनिष्ठा भारतीया:। सृष्टिनिर्माणविधौ सर्वाद्यतमा: खलु श्रुतय: । तथाहि –

### वैदिकेषु विष्णोः दैवत्वम्

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥[3] इत्यत्र सर्वादौ वेदानामाविर्भावमुद्घोष्य तदनन्तरमेव सर्वे ब्राह्मणादिवर्णाः यज्ञाश्च सञ्जाता इति प्रत्यपादि । श्रुतय एव सर्वं ज्ञानविज्ञानानां मूलमिति मन्यन्ते भारतीया: । सर्वं वेदात् प्रभवति इति नारुचिकरः ।

विशेषत: खलु यज्ञार्थमेव वेदानामवतार:। यज्ञश्च नाम परमात्मोपासनं नामकं कर्म। परमात्मनो ज्ञानमेव परमश्रेयसो मोक्षाख्यस्य सम्पादकमिति "तमेव विदित्वाऽतिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय"[4] इति श्रुति: प्रतिपादयति । सर्वव्यापक: परमात्मैव भगवान् विष्णु: । "तत्सृष्ट्वा तदेवानुप्राविशत्"[4] इति श्रुत्या विष्णुपदार्थः स्पष्टः । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् [6] अन्यत्र विष्णोः विक्रमविषयेऽपि वैदिकाः न मौनाः । यज्ञस्वरूपस्य विष्णोः वैभवं वैदिकाः इत्थं समामनन्ति । शतपथे "यज्ञो विष्णुः स देवेभ्यो इमां विकान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वि तीयमेन दिवमुत्तमेना"[7] "शंनो विष्णुरुरुक्रम:"[8] "इमाँल्लोकान्विचक्रमेऽथो वेदानथो वाचम्"[9] "विराड् अग्रे समभवत्"[10] इत्यादिषु विष्णोः सर्वदेवमयत्वं सर्वविक्रमत्वं सिद्धम् । विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजासिं। यो अस्कभयदुत्तरं सवस्थं विचक्रमाणस्त्रेधोरुगाय।।[11]

अत्र विष्णोः व्यापनशीलस्य देवस्य वीरकर्माणि अतिशीघ्रं प्रब्रवीमि इति साक्षात् मन्त्रद्रष्टा ऋषिः अवोचत्। यो विष्णुः पार्थिवानि रजासिंति रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीनि अग्निवाय्वादिरूपाणि रजांसि विशेषेणानि निर्ममे। यः विष्णुः त्रेधा क्रियमाणः अतिविस्तीर्णं सघस्थम् अन्तरिक्षम् स्तम्भितवान्, इति।

अस्मिन् मन्त्रे ऋषिः दीर्घतमा विष्णोः बीरकर्माणि वक्तुकामो विद्यते। वः पार्थिवानि विममे रजासिं इत्यनेन सायणाचार्यः विष्णोः सकाशात् सर्व जायते इति अवादीत्। परन्तु पुरुषसूक्ते यज्ञादेव सर्वं प्रसिद्धमिति विप्रत्तिपत्तिः। पुनः यद्यपि यास्काचार्यः अस्यामृचि उरुगायः इति शब्दस्य निर्वचनं विशालगतिमन्तम् अर्थ प्रतिपादयति तथापि पाश्चात्यविदुषः तथा सायणाचार्यादयः अस्वार्थम् उरुभिः महद्भिः गीयमानः इति भिन्नमर्थ कथयन्ति।

श्रीभगवान् विष्णुः स्वभक्तपरित्राणाय दुष्टविदलनाय च सदैव तत्तदवतारान् जग्राह । तस्य मूलं वेदेषु सम्प्राप्यते । श्रीविष्णो: स्वरूपं सामर्थ्यं सर्वव्यापकत्वमपि पुराणादिषु सर्वत्र प्रतिपाद्यन्ते । वेदेष्वेव तद्दर्शनं प्रथमम् । तथाहि ऋक्संहितायां विष्णुसूक्तेषु विष्णो: परमात्मस्वरूपत्वम् - "विष्णो देवत्वं परमस्य वित्से" । "न ते विष्णो जायमानो न जातो देव महिम्न: परमन्तमाप"।[12] अत्र हि विष्णु: परमः । तस्य महिमा अगोचर उक्तः ।

विष्णोर्महान्ति कर्माणि विष्णुसूक्तेषु "उरुक्षितिं सुजनिमाचकार"[13] इत्येतस्मिन् वाक्ये पृथिव्या: समृद्धये अयमवततार परमात्मा इति सूच्यते । पावमानमण्डले च स्पष्टमेव श्रूयते "हरि: सन्योनिमासदत्"[14] । हरिर्विष्णुर्जन्म लब्धवानित्यर्थ: । आर्चिकेषु विष्णुसूक्तेषु च विष्णोर्वामनावतारवर्णनं सुस्पष्टतया दृश्यते । वामनरूपिणो विष्णोर्यज्ञभूमिगमनं : तत्र "बृहच्छरीरो विमिमान ऋक्वभिर्युवा कुमार: प्रत्येत्याहवम्" ।[15] अत्र युवा कुमार: आहवं नामयज्ञं प्रत्येति गच्छतीति वामनवटोर्यज्ञे गमनं व्यज्यते । त्रिभि: पदक्रमैर्विश्वस्याक्रमणम् :- "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" ।[16] "त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्य:" ।[17] "विचक्रमाणस्त्रेधोरुगाय:" ।[18] "यस्योरुषु त्रिषु विक्रमाणेष्वधिक्षियन्ति भुवनानि विश्वा" ।[19] इत्यादिभिश्च वाक्यै: पौराणिकै: प्रतिपाद्यमानो वामनरूपिणो विष्णोर्विक्रम: नाम गमनं सूच्यते। अयं च परमात्मा जगत्राणार्थमेव अवतारादिकं धारयति ।

**अभ्युदयकाल**

अनुमानं भवति यत् ख्रीष्टपूर्वषष्ठशताब्द्यां ब्राह्मणग्रन्थोक्तहिंसकयज्ञानां प्रतिक्रियारूपेण बौद्धजैनधर्मेषु बहूनि आन्दोलनानि प्रचलन्ति स्म, इतः पूर्व शान्ततया स्थिररूपेण एकः पूजाप्रधानसम्प्रदायः आसीत् । आरम्भादयं वृष्णिवंशीय-क्षत्रियसम्प्रदायस्य सात्वतजातिषु सीमितः आसीत्। साक्षात् वैदिकपरम्परायाः विरोधं न कृतवानसौ अपितु वेदविहितस्य अहिंसाधारितधर्मस्य समर्थनं कृतवान् । तस्य प्रवृत्तिः बौद्धजैनान्दोलनात्मिका खण्डनात्मिका, प्रबलविचिकित्सा नासीत्, सुतरामस्य सम्प्रदायस्य लोकप्रियता ह्रासा ।

वैदिकयुगे वासुदेवस्य प्राधान्यमासीत् । चतुर्थे शतके पाणिनेः अष्टाध्यायीसूत्रादपि[20] वासुदेवस्य उपासकस्य प्रमाणं प्राप्यते। तृतीयचतुर्थशताब्द्याः आरभ्य प्रथमशताब्द्यां यावत् वासुदेवस्य पूजायाः बहूनि प्रमाणानि प्राचीनसाहित्येषु पुरातत्त्वशास्त्रेषु च दरीदृश्यन्ते ।

दक्षिणस्य प्राचीनतामिलसाहित्ये वासुदेवस्य, संकर्षणस्य, कृष्णस्य च बहवः सन्दर्भाः सन्ति। एतेषां सन्दर्भाणामाधारेण अनुमानितम् यत् उपर्युक्ताः सात्वतजनाः, ये वैदिकपूर्वजैः सह जातिविशेषा आसन्, ते मगधराजस्य जरासन्धस्याक्रमणेन कुरुपाञ्चालस्य शूरसेन प्रदेशात् पश्चिमसीमाप्रदेशं प्रति गतवन्तः । एतेषु केचन जनाः पलावनगरे तस्य दक्षिणे च संप्रति निवसन्ति स्म । ततः देशस्य सम्पूर्णं उत्तरप्रदेशं कोङ्कनं च प्रसृतवन्तः, केचन दक्षिणतरं गतवन्तः ।

## भागवतधर्म

प्रारम्भे क्षत्रियैः समारब्धः अब्राह्मणपूजामार्गः भागवतधर्म आसीत् । सम्भवतः नास्तिकावैदिकाबौद्धजैनानां प्रधानतां दृष्ट्वा परवर्तिसमये ब्राह्मणैः तत् स्वीकृतवन्तः । औपचारिकरूपेण वैष्णवाः नारायणस्य प्राधान्यमस्मिन् धर्मे विहितम् । शान्तिपर्वणि[21] नारायणकथायां अयं नूतनः धर्मः वैष्णवयज्ञः नाम्ना परिचितः । अत्र यज्ञप्रधानप्रवृ-त्तिमार्गस्य विपरीतं निवृत्तिमार्गस्यापि उपदेशो विहिथ । अस्मिन् वैष्णवयागे पशुवधः स्पष्टतया निषिद्धः । तपः, सत्यम्, अहिंसा, इन्द्रियाणां निरोधविषयाश्च वर्णिताः । महाभारते वासुदेवः वैदिकदेवस्य विष्णोरभिन्नः इति निर्दिष्टः । तस्मिन् समये कृष्णोऽपि वासुदेवस्य अवतारः इति प्रसिद्धः। ऋग्वेदे प्राप्यमाणेषु विष्णुसम्बद्धेषु कतिपयेषु मन्त्रेषु तस्य वर्णनं अतीव भव्यरूपेण कृतम् । असौ त्रिविक्रमः सम्पूर्णं जगत् त्रिषु पादप्रक्षेपेषु मापयति ।[22] विष्णुः पृथिव्यां लोकानां स्रष्टा ऊर्ध्वलोके आकाशं स्थिरं करोति सोपानत्रयेण च सर्वं परिमाणं करोति। ऋग्वेदे विष्णुः अजेयः गोपविष्णुर्गोपः अदाभ्योऽपि उच्यते[23] तस्य परमपादे भूरिश्रृङ्गनाम्ना गवां निवासस्थानमस्ति ।[24] तद्विष्णो परमलोकः गोलोकः इति उच्यते । यज्ञप्रधान-ब्राह्मणकाले विष्णोर्महत्त्वं वर्धितम् । सः एव 'यज्ञपुरुष इति नाम ख्यातः । तदापेक्षया अग्नेर्हीनत्वं प्रदर्शितः । ऐतरेयब्राह्मणे[25] विष्णुना राक्षसेभ्यः पृथिवीमपहृत्य इन्द्राय प्रदत्तम्। शतपथब्राह्मणेपि [26] तथैव उल्लेखः अस्ति ।

## उपसंहार

एवं वैदिकदेवस्य इन्द्रस्य अपेक्षया विष्णोः सर्वश्रेष्ठत्वं महत्त्वं ब्राह्मणकालात् अद्यावधि वर्धमानं प्रारब्धम् । भगवतो विष्णो अवतारप्रसंगाः ब्राह्मणग्रन्थेष्वपि विद्यमानाः सन्ति । यद्धवतु विष्णुः वैदिकदेवतानां मध्ये नूतनः पशुयज्ञविरोधिधर्मस्य उपास्यभवितुं सर्वाधिकं उपयुक्तः इति विवेचितः । अतः महाभारतोक्तवासुदेवः एव विष्णोरभिन्नः कृष्णरूपेण दर्शितः । वासुदेवोपासकानां योऽयं धर्मः स एव वैष्णवधर्मनाम्ना प्रसिद्धिं गतम् ।

## सन्दर्भ


1. ऋग्वेद का सुबोध भाष्य, भाग-2, श्रीपाद दामोदर सातवलेकर; स्वाध्याय मण्डल, किल्ला पारडी, वलसाड (गुजरात); (प्रथम खण्ड) संस्करण-अनुल्लिखित., पृ.403.
2. वाचस्पत्ये पृ ४९३५
3. पौरुषसूक्तम्-१
4. श्वेताश्वेते-३/१५
5. तैतरीयोपनिषत्-२/६/४
6. ऋक्-१/२२/२०
7. शतपथब्राह्मणः-१/९/३/९
8. ऋक्-१/९०/९
9. शतपथब्राह्मणः-५/४/२/६
10. अथर्ववेदे-१९/९/९
11. ऋक्-१/१५४/१
12. ऋक् संहिता-७/९९/२
13. ऋक् विष्णुसूक्ते
14. पवमानमण्डले
15. ऋक्- १/२२/१७
16. तत्र-१/२२/१७
17. तत्र १/२२/१८
18. तत्र
19. तत्रैव
20. कृष्णार्जुनाभ्यां वुन् अष्टाध्यायी ४/३/९८

21. महाभारते
22. ऋक्-१/१/५४/२
23. तत्र-१/२२/१८
24. तत्र- १/१५४/६
25. तैतरेयब्राह्मणे-८/३/१५
26. शतपथे-१/९.३/९
27. १.ऋग्वेदसंहिता
28. २.श्वेताश्वेतरोपनिषद्
29. ३.महाभारतम्
30. ४.तैतरीयब्राह्मणः
31. ५.अष्टाध्यायीसूत्रपाठः
32. ६.तैतरीयोपनिषद्
33. ७.शतपथब्राह्मणः
34. ८.निरुक्तम्
35. ९.वाचस्पत्यम्